# Mandapalakritam Agni Stotram

# मन्दपालकृतं अग्निस्तोत्रम्

## Document Information

Text title : Mandapalakritam Agni Stotram

File name : mandapAlakRRitaMagnistotram.itx

Category : deities_misc, mahAbhArata, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | Adiparva | adhyAya 220/22-29||

Latest update : October 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 18, 2025

*sanskritdocuments.org*

# मन्दपालकृतं अग्निस्तोत्रम्

मन्दपाल उवाच ।
त्वमग्ने सर्वदेवानां मुखं त्वमसि हव्यवाट् ।
त्वमन्तः सर्वभूतानां गूढश्चरसि पावक ॥ २२॥

त्वामेकमाहुः कवयस्त्वामाहुस्त्रिविधं पुनः ।
त्वामष्टधा कल्पयित्वा यज्ञवाहमकल्पयन् ॥ २३॥

त्वया सृष्टमिदं विश्वं वदन्ति परमर्षयः ।
त्वदृते हि जगत्कृत्स्नं सद्यो न स्याद्धुताशन ॥ २४॥

तुभ्यं कृत्वा नमो विप्राः स्वकर्मविजितां गतिम् ।
गच्छन्ति सह पत्नीभिः सुतैरपि च शाश्वतीम् ॥ २५॥

त्वामग्ने जलदानाहुः खे विषक्तान्सविद्युतः ।
दहन्ति सर्वभूतानि त्वत्तो निष्क्रम्य हायनाः ॥ २६॥

जातवेदस्तवैवेयं विश्वसृष्टिर्महाद्युते ।
तवैव कर्म विहितं भूतं सर्वं चराचरम् ॥ २७॥

त्वयाऽऽपो विहिताः पूर्वं त्वयि सर्वमिदं जगत् ।
त्वयि हव्यं च कव्यं च यथावत्सम्प्रतिष्ठितम् ॥ २८॥

अग्ने त्वमेव ज्वलनस्त्वं धाता त्वं बृहस्पतिः ।
त्वमश्विनौ यमौ मित्रः सोमस्त्वमसि चानिलः ॥ २९॥

इति महाभारते आदिपर्वणि २२० अध्यायान्तर्गतं

महाभारत । आदिपर्व । अध्याय २२०/२२-२९॥

mahAbhArata . Adiparva . adhyAya 220/22-29..

Proofread by PSA Easwaran

*Mandapalakritam Agni Stotram*

pdf was typeset on October 18, 2025

Please send corrections to *sanskrit@cheerful.com*